International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 05-09
© 2020 IJSR
www.anantaajournal.com
Received: 05-07-2020
Accepted: 08-08-2020

**Dr. Chandrakala R Kondi**
Assistant Professor,
Central Sanskrit University,
Rajiv Gandhi Campus,
Sringeri, Chikkamagaluru
Karnataka, India

**Corresponding Author:**
**Dr. Chandrakala R Kondi**
Assistant Professor,
Central Sanskrit University,
Rajiv Gandhi Campus,
Sringeri, Chikkamagaluru
Karnataka, India

# शक्तिग्रहविमर्शः

**Dr. Chandrakala R Kondi**

इदमन्धं तमःकृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिः आसंसारं न दीप्यते ॥ [1]

इत्युक्तम् आचार्यदण्डिना। ज्योतिरूपः शब्दः अर्थं प्रकाशयति। शब्दप्रयोगस्य प्रयोजनमेव अर्थप्रत्यायनं खलु। तद्विना शब्दप्रयोगस्य अन्यत् प्रयोजनमेव नास्ति। अर्थप्रत्ययोऽपि शब्दादेव भवति, नान्यथा। एवं शब्दस्य कश्चन अर्थः, अर्थस्य च कश्चन शब्दः इतिरीत्या शब्दार्थयोः नित्यसम्बन्धः स्वीकृतः। इदानीं कश्चन प्रश्नः अस्माकं पुरतः तिष्ठति। कः प्रश्नः ? लोके शब्दा बहवः सन्ति, अर्था अपि बहवः। कुत्रचित् एकस्य शब्दस्य बहवोऽर्थाः। अन्यत्र कुत्रचित् एकस्य अर्थस्य बहवः शब्दाः दृश्यन्ते। अमरकोशे वयं पश्यामः यत् प्रथमकाण्डे एकस्य अर्थस्य बहवः शब्दाः सन्तीति। देवाः इत्यस्य एकस्य अर्थस्य बहवः शब्दाः दर्शिताः सन्ति-

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ [2]

इत्यादि। तथैव तृतीयकाण्डे नानार्थवर्गे एकस्य शब्दस्य बहवोऽर्थाः। हरिः इति शब्दस्य पश्यन्तु-

यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु।
शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु ॥ [2]

इति। हरिः इत्येकस्य शब्दस्य यमः, वायुः, चन्द्रः, सूर्यः, विष्णुः, सिंहः, अश्वः, शुकः, सर्पः, कपिः, भेकः इत्यनेके अर्थाः।

एवं सति कथं शब्दार्थयोः व्यवस्था ? अस्माभिरनुभूयते यत् सर्वेषां शब्दानां सर्वेऽर्थाः न सन्ति लोके इति। कस्यचिन्निर्दिष्टात् शब्दात् कश्चन निर्दिष्टार्थ एव प्रतीयते। तर्हि तत्र काचिद्व्यवस्था कल्पिता वर्तत इति तु ज्ञायत एव। तथा कल्पिता व्यवस्था एव शक्तिग्रहः। 'सङ्केतः' इत्येष तस्य पर्यायः। 'अस्मात् पदात् अयमर्थो बोद्धव्यः' अथवा 'अस्य पदस्य अयमर्थः' इति सङ्केतनियमे बद्धौ शब्दार्थौ। सः सङ्केतनियम एव शब्दार्थयोर्मध्ये वर्तमानः प्रतिपाद्यप्रतिपादकभावसम्बन्धः। शब्दनिष्ठप्रतिपादकतानिरूपितप्रतिपाद्यता अर्थे, अर्थनिष्ठ-प्रतिपाद्यतानिरूपितप्रतिपादकता शब्दे इतिरीत्या सः सम्बन्धः तयोर्मध्ये भवति। अनेन शब्दार्थयोः व्यवस्था सुव्यवस्थिता। कथमिति चेत् घटशब्दस्यार्थः घटः

अर्थात् कलशः। अत्र घटशब्दः प्रतिपादकः, कलशः तेन शब्देन प्रतिपाद्यः। अतः घटशब्दनिष्ठप्रतिपादकतानिरूपितप्रतिपाद्यता कलशरूपे अर्थे वर्तते, कलशरूपार्थन्निष्ठप्रतिपाद्यतानिरूपितप्रतिपादकता घटशब्दे वर्तते इतिरीत्या तयोर्मध्ये प्रतिपाद्यप्रतिपादकभावः सङ्गच्छते। पटः घटशब्देन प्रतिपाद्यः न भवति। पटनिष्ठप्रतिपाद्यतानिरूपितप्रतिपादकता घटशब्दे नास्ति, किन्तु पटशब्द एव वर्तते। तेन घटशब्द-पटरूपार्थयोर्मध्ये प्रतिपाद्य-प्रतिपादकभावसम्बन्धः नास्ति। अतः घटशब्देन पटार्थः न सङ्केतितः।

एवं शब्दार्थौ एव व्यावहारिकजगतः आधारौ भवतः, तयोश्च शब्दार्थयोः आधारः भवति सङ्केतः। अलङ्कारमूर्धन्यः वाग्देवतावतारः मम्मटाचार्यः स्वरचिते काव्यप्रकाशाख्ये ग्रन्थे द्वितीयोल्लासे वाचकशब्दनिरूपणावसरे 'साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः' इति तल्लक्षणमुक्त्वा सङ्केतस्य महत्त्वमेवं प्रतिपादयति-

'इह अगृहीतसङ्केतस्य अर्थप्रतीतेरभावात् सङ्केतसहाय एव शब्दः अर्थविशेषं प्रतिपादयति इति यस्य यत्र अव्यवधानेन सङ्केतो गृह्यते स तस्य वाचकः' [4] इति। गौः इत्युक्ते गोरूपार्थ एव गृह्यते, तत्रैव तस्य शब्दस्य सङ्केतः वर्तते इत्येतत्तत्र कारणम्। तत्र गौः शब्दस्यार्थः गौः एव वा ? मनुष्यः स्याद्वा ? इति सन्देह एव नोदेति। तथैव मनुष्यः इत्युक्ते मनुष्ये एव, न तु गवि। एवं सङ्केतः नियमरूपेण कार्यं करोति शब्दार्थव्यवहारे।

"अस्य शब्दस्य अयमर्थ" इति लोके शब्दार्थयोः या व्यवस्था कृता वर्तते तां व्यवस्थामनुसृत्य प्रवर्तमानः शब्दव्यापारः अभिधा। तत्र वाचकशब्दलक्षणे अर्थ इत्यनेन सङ्केतितार्थ एवोक्तः। तमर्थं यः बोधयति स वाचकशब्दः। स एव सङ्केतितार्थः अभिधेयापरपर्यायः मुख्यार्थः। अतः तं मुख्यमर्थं वाचकशब्दः अभिधाव्यापारद्वारा बोधयतीति तात्पर्यम्। मुख्यार्थबोधनात् स व्यापारोऽपि मुख्य एव। मुख्य इत्यनेन लक्षणाव्यञ्जनादयो व्यावृत्ताः।

एवं सङ्केतः शब्दार्थयोः वाच्य-वाचकभावनिर्वर्तकः। तयोः प्रतिपादकः व्यापारः भवति अभिधा। इयं च अभिधावृत्तिः शक्तिशब्देनापि उच्यते। नैयायिकाः 'शक्तं पदम्' इति पदलक्षणं वदन्ति। तत्र शक्तिर्नाम 'अस्मात् पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः' [5] इत्युक्तम्। अतः सङ्केत एव शक्तिः। तेन यस्य शब्दस्य यस्मिन्नर्थे शक्तिरस्ति अर्थात् अभिधाव्यापारः वर्तते तदेव तस्यार्थस्य प्रतिपादकं पदम् इति पर्यवस्यति। एवं वाचकः शब्दः, तस्मात् ज्ञायमानः अर्थः वाच्यार्थः, स एव सङ्केतितार्थः।

एवं सङ्केतमनुसृत्यैव एकस्मात् पदात् कश्चन निर्दिष्टार्थः ज्ञायते। अत एव सर्वेभ्यः शब्देभ्यः सर्वेऽर्थाः न बोध्यन्ते। तत्तच्छब्देभ्यः स स एवार्थः बोध्यते, न तु सर्वः। अत एव मम्मटाचार्यैः शब्दः 'अर्थविशेषं' प्रतिपादयति इत्युक्तम्। तत्र 'विशेष'शब्दस्यार्थः 'लोके निर्दिष्ट' इत्येव, अर्थात् सङ्केतित इति। एष चार्थः शब्दात् अव्यवधानेन गृह्यते। यतः शब्द-तदर्थयोर्मध्ये अन्यत्किमपि न भवति व्यवधानम्।

अनेन स्पष्टं ज्ञातं यत् सङ्केतग्रहो नाम शक्तिग्रहः इत्यर्थः। अयं च शक्तिग्रहः कथं भवतीति विद्वद्भिः एवमुक्तमस्ति-

शक्तिग्रहो व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥[6]

**इति। तत्र,**

१. व्याकरणात्-धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहः व्याकरणाद्भवति। भू-सत्तायां, डु-पचष्-पाके इति व्याकरणात् भू आदिधातूनां सत्तादौ शक्तिग्रहः। लः कर्मणि च भावे च अकर्मकेभ्यः इति सूत्रेण लकाराणां कृतौ शक्तिग्रहः। वर्तमाने लट् इति लटः वर्तमाने शक्तिग्राहकं भवति व्याकरणम्।

२. उपमानात्-उपमानं नाम उपमितिकरणम्। सञ्ज्ञा-सञ्ज्ञिसम्बन्धज्ञानम् उपमितिः। तत्करणं भवति सादृश्यज्ञानम्। गोसदृशो गवयः इत्याकारक-अतिदेशवाक्यार्थ-स्मरणरूपव्यापारेण 'गवयः गवयपदवाच्यः' इति गवयपदस्य गोसदृशे गवये शक्तिः उपमानात् गृह्यते।

३. कोशात्-अमरकोशादिभिरपि सक्तिः गृह्यते। 'अप्येकदन्तहेरम्बलम्बोदरगजाननाः' इति गणेशस्य नामानि उक्तानि। तेन हेरम्बपदस्य गणेशे शक्तिग्रहः भवति।

४. आप्तवाक्यात्-आप्तः नाम यथार्थवक्ता। कोकिलः पिकपदवाच्यः, हंसः मरालपदवाच्यः इत्यादिवाक्यात् पिकमरालादिपदानां कोकिलहंसादौ शक्तिग्रहः भवति।

५. व्यवहारः-व्यवहारो नाम क्रिया। प्रयोजकवृद्धः गामानय इति वदति। तच्छ्रुत्वा प्रयोज्यवृद्धः गाम् आनयति। तदवधार्य पार्श्वस्थः बालः 'गवानयनरूपं कार्यम्' 'गामानये'तिशब्दप्रयोज्यम् इति अवधारयति। ततः 'गां नय; 'अश्वम् आनय' इत्यादिवाक्यात् आवाप-उद्वापाभ्यां गोपदस्य अश्वपदस्य च सास्नादिमत्त्व-एकशफवत्त्वादिविशिष्टव्यक्तिविशेषयोः शक्तिं गृह्णाति।

६. वाक्यशेषात्-'यवमयः चरुर्भवति' इति कश्चन प्रयोगः। अत्र यवशब्दः

अ) वृद्धव्यवहारात् दीर्घशूकविशिष्टव्रीहिवाचकः भवति।

आ) म्लेच्छव्यवहारात् प्रियङ्गुवाचकः

इ) कर्णाटव्यवहारात् क्षेत्रगोधूमवाचकः

भवति। तर्हि अत्र कः अर्थः यवशब्दस्य इति संशये,

वसन्ते सर्वसस्यानां जायते पत्रशातनम्।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः ॥

इति वाक्यशेषात् दीर्घशूकविशिष्टे शक्तिग्रहः भवति। वाक्यशेषो नाम शिष्टवाक्यम्, परिसङ्ख्यावाक्यम्। तादृशवाक्यजन्यशाब्दबोधात् शक्तिग्रहः भवति।

७. विवृतेः-अर्थात् विवरणात्। पचति इत्यस्य पाकं करोति इति विवरणात् आख्यातस्य यत्ने शक्तिग्रहः भवति। 'घटः अस्ति' इत्यत्र 'कलशः अस्ति इति विवृतेः शक्तिग्रहः।
८. सिद्धपदसान्निद्ध्यात्-'इह सहकारतरौ मधुरं पिको रौति' इति प्रयोगः। अत्र सहकारतरौ मधुरशब्दकर्ता कोकिल एवेति निश्चयवतः पिकशब्दस्य कोकिले शक्तिग्रहः।

एवं शक्तेः नाम सङ्केतस्य ग्रहः भवति। तर्हि कथं गृहीतः भवति सङ्केतः इति ज्ञातमस्माभिः। इदानीं सङ्केतः कुत्र गृह्यते इति प्रश्नः वर्तते। एष सङ्केतः कुत्र गृह्यते इत्यस्मिन् विषये शास्त्रकाराणां ऐकमत्यं नास्ति। तत्र केचन व्यक्तौ इति, केचन जात्याद्युपाधिष्विति, अपरे केवलं जातौ इति, अन्ये जातिविशिष्टव्यक्तौ इति, केचन अपोह इति अभिप्रयन्ति। तदिदानीमेकैकशः पश्यामः।

व्यक्तिशक्तिवादः

एतेषामभिप्रायः वर्तते यत् अर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव। अतः व्यक्तौ एव सङ्केतः वक्तव्यः इति। 'गाम् आनय' इति यदि उच्यते तदा गोव्यक्तिरेव आनीयते, न गोत्वजातिः, न वा कपिलादिगुणः, न गमनादिक्रिया, न वा डित्थादिसञ्ज्ञा। अतः व्यक्तौ एव सङ्केतः कर्तुं योग्यः इति। एतन्मतं प्राचीननैयायिकानामिति केचन वदन्ति।

आपाततः एष वादः समीचीन इत्येव भाति। किन्तु मम्मटाचार्यैः अस्मिन् वादे दोषत्रयम् उद्भावयति-आनन्त्यम्, व्यभिचारः विषयविभागाप्राप्तिश्चेति। तदेकैकशः पश्यामः।

आनन्त्यम्-अनन्तस्य भावः आनन्त्यम्। व्यक्तयः अनन्ताः इति तु सिद्धमेव। जगति कति गोव्यक्तयः सन्तीति कथं वा वक्तुं शक्यम् ? भूतभविष्यद्वर्तमानेषु ये गावः भवन्ति तत्सर्वं को वा जानीयात् ? अतः यदि व्यक्तौ सङ्केतो गृह्यते तर्हि जगति गवां या सङ्ख्या वर्तते तत्सङ्ख्यया एव सङ्केतोऽपि कल्पनीयो भवति अर्थात् गोशब्दस्य एकैकं गावः एकैकं सङ्केत इति रीत्या आनन्त्यदोषः सम्भवति।

व्यभिचारः-गोशब्देन यां गोव्यक्तिमुद्दिश्य सङ्केत उच्यते तद्विहाय असङ्केतितेषु गोव्यक्तिष्वपि गोशब्दः अन्वेतीति व्यभिचारदोषः।

विषयविभागाप्राप्तिः-विषयाः जाति-गुण-क्रिया-सञ्ज्ञाः। गौः शुक्लः चलः डित्थः इत्यस्मिन् प्रयोगे चत्वारोऽपि शब्दाः एकमेव गावमुद्दिश्य प्रयुक्ताः। परन्तु एते क्रमात् जाति-गुण-क्रिया-सञ्ज्ञावाचकाः भवन्ति। यदि व्यक्तौ सङ्केतं स्वीकुर्मस्तर्हि एकामेव गावमुद्दिश्य प्रयुक्ता एते चत्वारः शब्दाः समानार्थका इति वक्तव्यं भवति। जाति-गुण-क्रिया-सञ्ज्ञारूपेण तेषां विभागो न शक्यते।

एवं दोषत्रयसम्भवात् व्यक्तौ सङ्केतः न स्वीकरणीयः किन्तु उपाधिष्वेव- तदुपाधावेव सङ्केतः। 7

जात्यादि (उपाधि) शक्तिवादः

'सङ्केतितश्चतुर्भेदो जात्यादिः' इति जात्यादिसङ्केतवादः प्रस्तुतः मम्मटाचार्यैः। उप=समीपवर्तिनि आदधाति=सङ्क्रामयति स्वीयं धर्मम् इति उपाधिः। अयञ्च व्यक्तेः विशेषणं भवति। जाति-गुण-क्रिया-सञ्ज्ञाः उपाधयः। तेषां स्वरूपमत्र मम्मटाचार्यः प्रतिपादितवान्। व्यक्तौ शक्त्यङ्गीकारे आनन्त्य–व्यभिचार-विषयविभागाप्राप्तिरूपदोषा सम्भवन्तीति एतेषूपाधिष्वेव सङ्केतो वक्तव्य इति वदतां वैयाकरणानां मतम् अत्र प्रस्तुतमस्ति तेन। तदेवम्-

जातौ सङ्केतः-जातिः सामान्यापरनामधेया। 'नित्यमेकमनेकानुगतं सामान्यम्' इत्युक्तत्वात् जातिः नित्या। अनेकव्यक्तिषु वर्तमानं सामान्यमेव जातिः। यथा जगति वर्तमानेषु सर्वेषु घटेषु वर्तमाना जातिः 'घटत्वम्'। एवमेव गोत्वम्, मनुष्यत्वमित्यादि। अत्र मम्मटाचार्यः भर्तृहरेः एकं वाक्यं प्रस्तौति। तदनुसारं गौः स्वरूपमात्रेण अर्थात् उपाधिरहितव्यक्तिमात्रस्वरूपेण सास्नादिमत्त्वादिधर्ममात्रेण 'गौः' न भवति=गौः इतिव्यवहारस्य हेतुः न भवति। अन्यथा उपाधिरहितत्वात् घटोऽपि गौः स्यात्। तथैव 'गौः न' इत्यस्यापि व्यवहारस्य हेतुर्न भवति=गोभिन्नानामश्वादीनां व्यावर्तकमपि न भवतीत्यर्थः। तर्हि कथं सः गौः इत्यस्य व्यवहारस्य योग्यतां प्राप्नोति ? गोत्वरूपजातेः सम्बन्धादेव इति वक्तव्यम्। गोत्वजात्यैव सः गोपदव्यवहारस्य हेतुरपि भवति, गोभिन्नस्य व्यावर्तकोऽपि भवति। अतः 'गामानय' इति प्रयुक्ते सति गौः-अश्व-मनुष्यादिषु मध्ये 'गोत्व'जात्या सम्बद्ध एव आनीयते। तत्र वर्तमानेषु गवेतरप्राणिषु अश्वादिषु गोत्वजात्या सम्बद्धत्वं नास्तीत्येव तेषु गोत्वज्ञानं न भवति। अतः जातौ सङ्केत इत्येतद्युज्यते। एवमेव अश्वत्वसम्बन्धेन अश्वः, मनुष्यत्वसम्बन्धेन मनुष्यः इत्यादि ज्ञेयम्। एवं व्यक्तेः सत्त्वं जात्यधीनम्। अत एव जातिः 'पदार्थस्य प्राणप्रदः वस्तुधर्मः' इत्युक्तं मम्मटाचार्येण।

गुणे सङ्केतः-जात्या व्यक्तेः सत्ता लभ्यते इत्युक्तम्। तथा लब्धसत्ताकं वस्तु अर्थात् गोत्व-अश्वत्वादिभिः लब्धसत्ताकाः गौः-अश्व इत्याद्याः व्यक्तयः रक्त-श्वेत-कपिल-कृष्ण-शबलादि'गुणैः' स्वजातिसम्बद्धेभ्यः इतरव्यक्तिभ्यः भिद्यन्ते। उदाहरणार्थम्, रक्त-श्वेत-कपिल-कृष्ण-शबलादिवर्णयुक्ताः 'गोत्वजाति'सम्बद्धाः गावः परस्परं भिद्यन्ते, रक्तवर्णस्य गौः तदितरवर्णेभ्यः गोभ्यः, तथैव श्वेतवर्णस्य गौः रक्तादिवर्णयुक्तगोभ्यः इत्यादिरीत्या भिद्यन्ते। एतादृश'विशेषः' गुणैरेव साध्यते, न तु जात्या। अतः गुणः

'विशेषाधानहेतुः' इत्युक्तम्। विशेषः=भेदः आधीयते इति विशेषाधानम्। तस्य हेतुः गुण इति सः विशेषाधानहेतुः। अनेकवर्णयुक्तेषु किन्तु गोत्वजातिसम्बद्धेषु अनेकेषु गोव्यक्तिषु मध्ये 'श्वेतवर्णं गावम् आनय' इति प्रयोगे, श्वेतवर्णयुक्त एव गौः आनीयते, नेतरवर्णयुक्ता गाव इति गुणे सङ्केतः। एवं सजातीयवस्तुषु भेदसाधकः गुणः।

इमौ जाति-गुणौ सिद्धरूपौ वस्तुधर्माणौ। अर्थात् व्यक्तेः जननेन सहैव भवतः।

क्रियायां सङ्केतः-पूर्वापरीभूतावयवः अर्थात् आद्यन्तरूपाभ्याम् अवयवाभ्यां युक्तो वस्तुधर्मः क्रिया। साध्यः अयम्, न तु सिद्धः जाति-गुणवत्। यतः वस्तुन उत्पत्त्या सह न भवति, उत्पत्तेरनन्तरमेव जायते इति हेतोः 'साध्यते'। चुल्ल्या उपरि स्थापनरूपा आदिः, चुल्लीतः अधः अवतारणरूपम् अन्त्यम्-अनयोः अवयवयोः मध्ये वर्तमानं कार्यं 'पाकक्रिया'। एवमेव गमनादि सर्वा अपि क्रियाः।

बहुषु गोषु मध्ये एकः स्वपिति, एकः गच्छति, एकः चर्वते, एकः खादति इत्येवंरीत्या बहुविधक्रियाः भवन्ति। तदा 'गच्छन्तं गावम् आनय' इति प्रयुज्यते। तदा गमनक्रियायां वर्तमानघ् गौरेवानीयते, नान्यः। अतः तदा 'क्रिया'यां सङ्केतः।

सञ्ज्ञायां सङ्केतः-वक्तुः यदृच्छया अङ्कितं नाम सञ्ज्ञा इत्युच्यते। अयञ्चोपाधिः वक्त्रा स्व-इच्छानुसारं व्यक्तिषु आरोप्यते। अत एव 'वक्तृयदृच्छासन्निवेशित' इत्युक्तम्। पितृभ्यां पुत्रस्य देवदत्तः, यज्ञदत्त इत्यादिना नाम क्रियते। सैव सञ्ज्ञा। तयोः पित्रोः यदृच्छया एव एतद्भवति। एकव्यक्तिगतोऽ-यमुपाधिः। 'यज्ञदत्तमानय' इति प्रयुक्ते देवदत्त-यज्ञदत्त-सोमदत्तादीनां बहूनां मध्ये 'यज्ञदत्त'सञ्ज्ञक एवानीयते इति सञ्ज्ञायां सङ्केतः।

एवं 'गौः' इति जातिशब्दः, 'शुक्ल' इति गुणशब्दः, 'चलः' इति क्रियाशब्दः, 'डित्थ' इति सञ्ज्ञाशब्द इति रीत्या एकस्यां व्यक्तौ शब्दानां प्रवृत्तिः चतुष्टयी भवतीति महाभाष्यकारः भगवान् पतञ्जलिः प्रतिपादयति। व्यक्तौ सङ्केतग्रहणेन अयं विभागः कर्तुं न शक्यते इति उपाधिषु सङ्केतग्रहणं वैयाकरणानाम् इष्टम्।

जातिशक्तिवादः

जातिरेव वा जात्यादिसङ्केतवादं कारिकायां संसूच्य, तस्य स्वरूपं विस्तृततया वृत्तौ एवं प्रतिपादितम्-' हिमपयःशङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्यभिन्नाभिधानप्रत्ययोत्पत्तिः तत् शुक्लत्वादि सामान्यम्, गुडतण्डुलादिपाकादिषु एवमेव पाकत्वादि, बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वादि अस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तम्' [8] इति।

जातिसङ्केतवादिनाम् अभिप्राये गुणे गुणत्वरूपजातिः, क्रियायां क्रियात्वरूपा, सञ्ज्ञायां च सञ्ज्ञात्वरूपा जातिरेव तेषां तेषां प्रवृत्तिनिमित्तं भवतीति ते सर्वेऽपि शब्दाः (गुणवाचक-क्रियावाचक-सञ्ज्ञावाचकशब्दाः) जातिशब्दा एव भवन्तीति जातौ सङ्केतग्रहणेन एतेषु सर्वेष्वपि सङ्केतः गृहीत एव। तदेवं विवृतं मम्मटाचार्येण-

गुणत्वजातिः-एक एव गुणः भिन्नभिन्नवस्तुषु भिन्न एव भवति। उदाहरणार्थं शुक्लगुणः जगति यावन्ति शुक्लवर्णवस्तूनिसन्तु तेषु सर्वेष्वपि वर्तते। हिमे, पयसि, शङ्खे, सुधायाम् इत्यादिरीत्या। तेन आश्रयभेदात् स शुक्लगुणोऽपि भिद्यते। हिमगतः शुक्लगुणोऽन्यः, पयोगतः, शङ्खगतः, सुधागतश्च अन्य एव। तथापि सर्वत्रापि अस्माभिः शुक्लः शुक्ल इत्येव व्यवह्रियते, शुक्लः हिमः, शुक्लं पयः, शुक्लः शङ्खः, शुक्ला सुधा इत्यादिरीत्या। एतादृशव्यवहारस्य कारणं भवति शुक्लत्वरूपं सामान्यम्। आश्रयभेदात् ताः भिन्नव्यक्तय एव भवन्ति। अतः अनेकव्यक्तिगतत्वात् गुणत्वरूपं सामान्यं (जातिः) अङ्गीकर्तुं शक्यते। अतः गुणे सङ्केतग्रह इत्यस्य गुणत्वरूपजातौ सङ्केतग्रह इत्येव।

क्रियात्वजातिः-क्रियापि आश्रयभेदात् भिन्नैव। गुडस्य पाकः भिन्नः, तण्डुलस्य पाकः भिन्न एव। तथापि सर्वत्रापि पाकः पाक इत्येव व्यवहारः। तत्र कारणं 'पाकत्व'रूपजातिः। अतः क्रियायां सङ्केतः क्रियात्वजातौ सङ्केत इत्यत्रैव पर्यवस्यति।

सञ्ज्ञात्वजातिः-व्यक्तिः जननादारभ्य मरणपर्यन्तं प्रतिक्षणं भिद्यते। तेन बाल्ये कौमार्ये यौवने वृद्धाप्ये च व्यक्तिः भिद्यत एव। तथापि सर्वास्ववस्थासु एकैव सञ्ज्ञा तस्य भवति, न तु परिवर्त्यते। डित्थनामिका व्यक्तिः सर्वास्ववस्थासु अपि डित्थ इत्येव व्यवह्रियते। अस्य कारणं तु 'डित्थत्व'जातिरेव। अतः सञ्ज्ञायां सङ्केत इत्येतदपि जातौ एव पर्यवस्यति।

एवं सर्वेषामपि शब्दानां जातिरेव प्रवृत्तिनिमित्तमिति वदतां जातिसङ्केत-वादिनां मते केवलजातौ एव सङ्केतो गृह्यते, नान्यत्र।

जातिविशिष्टशक्तिवादः

तद्वान्= तत्=जातिः, तद्वान्=जातिमान्। जातिमान् (जातिविशिष्टव्यक्तिः) शब्दार्थः=सङ्केतित इति नैयायिकाः। केवलव्यक्तौ सङ्केतग्रहणे आनन्त्य-व्यभिचारदोषौ भवतः,केवलजातेरङ्गीकारे व्यक्तेरुपस्थितिर्न भवतीति ते जातिविशिष्टव्यक्तौ सङ्केतं स्वीकुर्वन्ति। घटशब्दस्य घटत्वजातियुक्ते, तत्सन्दर्भे विवक्षितायां घटव्यक्तौ सङ्केतः। 'व्यक्त्याकृतिजातयस्तु पदार्थः' इत्येतन्न्यायसूत्रं तस्याधारः। जाति-व्यक्त्योः अविनाभावः सम्बन्धः। अतः जातौ सङ्केते गृहीते जात्या व्यक्तिराक्षिप्यते इत्ययं सिद्धान्तः तेषां नानुमतः। यतः आक्षिप्तस्य शाब्दबोधेऽन्वयः न भवति 'शाब्दी हि आकाङ्क्षा शब्देनैव पूर्यते' इतिन्यायात् शब्दशक्त्या लब्धस्यार्थस्यैव शाब्दबोधेऽन्वयः।

अपोहशक्तिवादः

अपोहः=अतद्व्यावृत्तिः=तद्भिन्नभिन्नत्वम्। बौद्धैश्च प्रतिपादितः। तद्=गौः, तद्भिन्नं=गोभिन्नम् अश्वादिसर्वमपि,

तद्भिन्नं=गोभिन्नेभ्यः सर्वेभ्योऽपि भिन्नं गौरेव। अतः 'गौः' इत्यस्य गोभिन्नाद्भिन्नं=गौः इत्येवार्थः।

एवं शक्तिग्रहविषये शास्त्रकाराणाम् ऐकमत्यं नास्ति। तथापि लोकव्यवहारनिर्वाहार्थं समेषामपि शास्त्रकारानां योगदानं महद्वर्तत इति,

**संदर्भ**


1. दण्डी-काव्यादर्शे
2. अमरकोशः-प्रथमकाण्डम्
3. अमरकोशः-तृतीयकाण्डम्
4. काव्यप्रकाशः-द्वितीयोल्लासः
5. तर्कसङ्ग्रहः
6. न्यायसिद्धान्तमुक्तावल्याम्
7. काव्यप्रकाशः-द्वितीयोल्लासः
8. काव्यप्रकाशः-द्वितीयोल्लासः